श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्विषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विषष्टितमः सर्गः ॥

## श्रीरामस्य मुनीन् प्रति लवणासुरस्याहारविहारविषये प्रश्नः शत्रुघ्नस्य रुचिं ज्ञात्वा तेन तस्य लवणवधे नियोजनं च

तथोक्ते तानृषीन् रामः प्रत्युवाच कृताञ्जलिः।
किमाहारः किमाचारो लवणः क्व च वर्तते॥ **7.62.1** ॥

राघवस्य वचः श्रुत्वा ऋषयः सर्व एव ते।
ततो निवेदयामासुर्लवणो ववृधे यथा॥ **7.62.2** ॥

आहारः सर्वसत्त्वानि विशेषेण च तापसाः।
आचारो रौद्रता नित्यं वासो मधुवने तथा॥ **7.62.3** ॥

हत्वा बहुसहस्राणि सिंहव्याघ्रमृगाण्डजान्।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम्॥ **7.62.4** ॥

ततोऽन्तराणि सत्त्वानि खादते स महाबलः।
संहारे समनुप्राप्ते व्यादितास्य इवान्तकः॥ **7.62.5** ॥

तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन्।
घातयिष्यामि तद् रक्षो व्यपगच्छतु वो भयम्॥ **7.62.6** ॥

प्रतिज्ञाय तथा तेषां मुनीनामुग्रतेजसाम्।
स भ्रातॄन् सहितान् सर्वानुवाच रघुनन्दनः॥ **7.62.7** ॥

को हन्ता लवणं वीरः कस्यांशः स विधीयताम्।
भरतस्य महाबाहोः शत्रुघ्नस्य च धीमतः॥ **7.62.8** ॥

राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत्।
अहमेनं वधिष्यामि ममांशः स विधीयताम्॥ **7.62.9** ॥

भरतस्य वचः श्रुत्वा धैर्यशौर्यसमन्वितम्।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम्॥ **7.62.10** ॥

शत्रुघ्नस्त्वब्रवीद् वाक्यं प्रणिपत्य नराधिपम्।
कृतकर्मा महाबाहुर्मध्यमो रघुनन्दन॥ **7.62.11** ॥

आर्येण हि पुरा शून्या त्वयोध्या परिपालिता।
सन्तापं हृदये कृत्वा आर्यस्यागमनं प्रति॥ **7.62.12** ॥

दुःखानि च बहूनीह अनुभूतानि पार्थिव।
शयानो दुःखशय्यासु नन्दिग्रामे महायशाः॥ **7.62.13** ॥

फलमूलाशनो भूत्वा जटी चीरधरस्तथा।
अनुभूयेदृशं दुःखमेष राघवनन्दनः॥ **7.62.14** ॥

प्रेष्ये मयि स्थिते राजन् न भूयः क्लेशमाप्नुयात्।
तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत्॥ **7.62.15** ॥

एवं भवतु काकुत्स्थ क्रियतां मम शासनम्।
राज्ये त्वामभिषेक्ष्यामि मधोस्तु नगरे शुभे॥ **7.62.16** ॥

निवेशय महाबाहो भरतं यद्यवेक्षसे।
शूरस्त्वं कृतविद्यश्च समर्थश्च निवेशने॥ **7.62.17** ॥

नगरं यमुनाजुष्टं तथा जनपदाञ्शुभान्।
यो हि वंशं समुत्पाद्य पार्थिवस्य निवेशने॥ **7.62.18** ॥

न विधत्ते नृपं तत्र नरकं स हि गच्छति।
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम्॥ **7.62.19**॥

राज्यं प्रशाधि धर्मेण वाक्यं मे यद्यवेक्षसे।
उत्तरं च न वक्तव्यं शूर वाक्यान्तरे मम॥ **7.62.20**॥

बालेन पूर्वजस्याज्ञा कर्तव्या नात्र संशयः।
अभिषेकं च काकुत्स्थ प्रतीच्छस्व ममोद्यतम्।
वसिष्ठप्रमुखैर्विप्रैर्विधिमन्त्रपुरस्कृतम्॥ **7.62.21**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विषष्टितमः सर्गः॥